# Shriannapurnasahasranamastotram

# શ્રીઅન્નપૂર્ણાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : annapUrNAsahasranAmastotram

File name : annapUrNAsahasranAmastotra.itx

Category : sahasranAma, devii, pArvatI, annapUrNa, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : DPD, Alex

Proofread by : DPD, NA

Source : Rudrayamalatantra, bhagavatistutimanjari

Latest update : February 14, 2015, March 31, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 6, 2022

*sanskritdocuments.org*

# શ્રીઅન્નપૂર્ણાસહસ્રનામસ્તોત્રમ્

શ્રીરુદ્રયામલે

કૈલાસશિખરાસીનં દેવદેવં મહેશ્વરમ્ ।
પ્રણમ્ય દણ્ડવદ્ભૂમૌ પાર્વતી પરિપૃચ્છતિ ॥ ૧॥

શ્રીપાર્વત્યુવાચ ।
અન્નપૂર્ણા મહાદેવી ત્રૈલોક્યે જીવધારિણી ।
નામ્નાં સહસ્રં તસ્યાસ્તુ કથયસ્વ મહાપ્રભો ॥ ૨॥

શ્રીશિવ ઉવાચ ।
શ ૃણુ દેવિ વરારોહે જગત્કારણિ કૌલિનિ ।
આરાધનીયા સર્વેષાં સર્વેષાં પરિપૃચ્છસિ ॥ ૩॥

સહસ્રૈર્નામભિર્દિવ્યૈસ્ત્રૈલોક્યપ્રાણિપૂજિતૈઃ ।
અન્નદાયાસ્સ્તવં  દિવ્યં યત્સુરૈરપિ વાઞ્છિતમ્ ॥ ૪॥

કથયામિ તવ સ્નેહાત્સાવધાનાઽવધારય ।
ગોપનીયં પ્રયત્નેન સ્તવરાજમિદં શુભમ્ ॥ ૫॥

ન પ્રકાશ્યં ત્વયા ભદ્રે દુર્જનેભ્યો નિઃશેષતઃ ।
ન દેયં પરશિષ્યેભ્યો ભક્તિહીનાય પાર્વતિ ॥ ૬॥

દેયં શિષ્યાય શાન્તાય ગુરુદેવરતાય ચ ।
અન્નપૂર્ણાસ્તવં દેયં કૌલિકાય કુલેશ્વરી ॥ ૭॥

ૐ અસ્ય શ્રીમદન્નપૂર્ણાસહસ્રનામસ્તોત્રમાલામન્ત્રસ્ય,
શ્રીભગવાન્ ઋષિઃ, અનુષ્ટુપ્છન્દઃ,
પ્રકટગુપ્તગુપ્તતર સમ્પ્રદાય કુલોત્તીર્ણ નિગર્ભરહસ્યાતિ
રહસ્યપરાપરાતિરહસ્યાતિપૂર્વાચિન્ત્યપ્રભાવા ભગવતી
શ્રીમદન્નપૂર્ણાદેવતા, હલો બીજં, સ્વરાશ્શક્તિઃ, જીવો બીજં,
બુદ્ધિશ્શક્તિઃ, ઉદાનો બીજં, સુષુમ્ના નાડી, સરસ્વતી શક્તિઃ,

ધર્માર્થકામમોક્ષાર્થે પાઠે વિનિયોગઃ ॥

ધ્યાનમ્ ।
અર્કોન્મુક્તશશાઙ્કકોટિવદનામાપીનતુઙ્ગસ્તનીં
ચન્દ્રાર્ધાઙ્કિતમસ્તકાં મધુમદામાલોલનેત્રત્રયીમ્ ।
બિભ્રાણામનિશં વરં જપપટીં શૂલં કપાલં કરૈઃ
આદ્યાં યૌવનગર્વિતાં લિપિતનું વાગીશ્વરીમાશ્રયે ॥

અથ અન્નપૂર્ણાસહસ્રનામસ્તોત્રમ્ ।

॥ ૐ અન્નપૂર્ણાયૈ નમઃ ॥

અન્નપૂર્ણા અન્નદાત્રી અન્નરાશિકૃતાલયા ।
અન્નદા અન્નરૂપા ચ અન્નદાનરતોત્સવા ॥ ૧॥

અનન્તા ચ અનન્તાક્ષી અનન્તગુણશાલિની ।
અચ્યુતા અચ્યુતપ્રાણા અચ્યુતાનન્દકારિણી ॥ ૨॥

અવ્યક્તાऽનન્તમહિમા અનન્તસ્ય કુલેશ્વરી ।
અબ્ધિસ્થા અબ્ધિશયના અબ્ધિજા અબ્ધિનન્દિની ॥ ૩॥

અબ્જસ્થા અબ્જનિલયા અબ્જજા અબ્જભૂષણા ।
અબ્જાભા અબ્જહસ્તા ચ અબ્જપત્રશુભેક્ષણા ॥ ૪॥

અબ્જાનના અનન્તાત્મા અગ્નિસ્થા અગ્નિરૂપિણી ।
અગ્નિજાયા અગ્નિમુખી અગ્નિકુણ્ડકૃતાલયા ॥ ૫॥

અકારા અગ્નિમાતા ચ અજયાऽદિતિનન્દિની ।
આદ્યા આદિત્યસઙ્કાશા આત્મજ્ઞા આત્મગોચરા ॥ ૬॥

આત્મસૂરાત્મદયિતા આધારા આત્મરૂપિણી ।
આશા આકાશપદ્મસ્થા અવકાશસ્વરૂપિણી ॥ ૭॥

આશાપૂરી અગાધા ચ અણિમાદિસુસેવિતા ।
અમ્બિકા અબલા અમ્બા અનાદ્યા ચ અયોનિજા ॥ ૮॥

અનીશા ઈશિકા ઈશા ઈશાની ઈશ્વરપ્રીયા ।
ઈશ્વરી ઈશ્વરપ્રાણા ઈશ્વરાનન્દદાયિની ॥ ૯॥

ઇન્દ્રાણી ઇન્દ્રદયિતા ઇન્દ્રસૂરિન્દ્રપાલિની ।
ઇન્દિરા ઇન્દ્રભગિની ઇન્દ્રિયા ઇન્દુભૂષણા ॥ ૧૦॥

ઇન્દુમાતા ઇન્દુમુખી ઇન્દ્રિયાણાં વશઙ્કરી ।
ઉમા ઉમાપતેઃ પ્રાણા ઓડ્યાણપીઠવાસિની ॥ ૧૧॥

ઉત્તરજ્ઞા ઉત્તરાખ્યા ઉકારા ઉત્તરાત્મિકા ।
ઋમાતા ઋભવા ઋસ્થા ઋલૄકારસ્વરૂપિણી ॥ ૧૨॥

ઋકારા ચ લૄકારા ચ લૄતકપ્રીતિદાયિની ।
એકા ચ એકવીરા ચ એકારૈકારરૂપિણી ॥ ૧૩॥

ઓકારી ઓઘરૂપા ચ ઓઘત્રયસુપૂજિતા ।
ઓઘસ્થા ઓઘસમ્ભૂતા ઓઘધાત્રી ચ ઓઘસૂઃ ॥ ૧૪॥

ષોડશસ્વરસમ્ભૂતા ષોડશસ્વરરૂપિણી ।
વર્ણાત્મા વર્ણનિલયા શૂલિની વર્ણમાલિની ॥ ૧૫॥

કાલરાત્રિર્મહારાત્રિર્મોહરાત્રિઃ સુલોચના ।
કાલી કપાલિની કૃત્યા કાલિકા સિંહગામિની ॥ ૧૬॥

કાત્યાયની કલાધારા કાલદૈત્યનિકૃન્તની ।
કામિની કામવન્દ્યા ચ કમનીયા વિનોદિની ॥ ૧૭॥

કામસૂઃ કામવનિતા કામધુક્ કમલાવતી ।
કામદાત્રી કરાલી ચ કામકેલિવિનોદિની ॥ ૧૮॥

કામના કામદા કામ્યા કમલા કમલાર્ચિતા ।
કાશ્મીરલિપ્તવક્ષોજા કાશ્મીરદ્રવચર્ચિતા ॥ ૧૯॥

કનકા કનકપ્રાણા કનકાચલવાસિની ।
કનકાભા કાનનસ્થા કામાખ્યા કનકપ્રદા ॥ ૨૦॥

કામપીઠસ્થિતા નિત્યા કામધામનિવાસિની ।
કમ્બુકણ્ઠી કરાલાક્ષી કિશોરી ચ કલાપિની ॥ ૨૧॥

કલા કાષ્ઠા નિમેષા ચ કાલસ્થા કાલરૂપિણી ।
કાલજ્ઞા કાલમાતા ચ કાલધાત્રી કલાવતી ॥ ૨૨॥

કાલદા કાલહા કુલ્યા કુરુકુલ્લા કુલાઙ્ગના ।
કીર્તિદા કીર્તિહા કીર્તિઃ કીર્તિસ્થા કીર્તિવર્ધની ॥ ૨૩॥

કીર્તિજ્ઞા કીર્તિતપદા કૃત્તિકા કેશવપ્રિયા ।

કેશિહા કેલીકારી ચ કેશવાનન્દકારિણી ॥ ૨૪॥

કુમુદાભા કુમારી ચ કર્મદા કમલેક્ષણા ।
કૌમુદી કુમુદાનન્દા કૌલિની ચ કુમુદ્વતી ॥ ૨૫॥

કોદણ્ડધારિણી ક્રોધા કૂટસ્થા કોટરાશ્રયા ।
કાલકણ્ઠી કરાલાઙ્ગી કાલાઙ્ગી કાલભૂષણા ॥ ૨૬॥

કઙ્કાલી કામદામા ચ કઙ્કાલકૃતભૂષણા ।
કપાલકર્ત્રિકકરા કરવીરસ્વરૂપિણી ॥ ૨૭॥

કપર્દિની કોમલાઙ્ગી કૃપાસિન્ધુઃ કૃપામયી ।
કુશાવતી કુણ્ડસંસ્થા કૌબેરી કૌશિકી તથા ॥ ૨૮॥

કાશ્યપી કદ્રુતનયા કલિકલ્મષનાશિની ।
કઞ્જસ્થા કઞ્જવદના કઞ્જકિઞ્જલ્કચર્ચિતા ॥ ૨૯॥

કઞ્જાભા કઞ્જમધ્યસ્થા કઞ્જનેત્રા કચોદ્ભવા ।
કામરૂપા ચ હ્રીંકારી કશ્યપાન્વયવર્ધિની ॥ ૩૦॥

ખર્વા ચ ખઞ્જનદ્વન્દ્વલોચના ખર્વવાહિની ।
ખડ્ગિની ખડ્ગહસ્તા ચ ખેચરી ખડ્ગરૂપિણી ॥ ૩૧॥

ખગસ્થા ખગરૂપા ચ ખગગા ખગસમ્ભવા ।
ખગધાત્રી ખગાનન્દા ખગયોનિસ્વરૂપિણી ॥ ૩૨॥

ખગેશી ખેટકકરા ખગાનન્દવિવર્ધિની ।
ખગમાન્યા ખગાધારા ખગગર્વવિમોચિની ॥ ૩૩॥

ગઙ્ગા ગોદાવરી ગીતિર્ગાયત્રી ગગનાલયા ।
ગીર્વાણસુન્દરી ગૌશ્ચ ગાધા ગીર્વાણપૂજિતા ॥ ૩૪॥

ગીર્વાણચર્ચિતપદા ગાન્ધારી ગોમતી તથા ।
ગર્વિણી ગર્વહન્ત્રી ચ ગર્ભસ્થા ગર્ભધારિણી ॥ ૩૫॥

ગર્ભદા ગર્ભહન્ત્રી ચ ગન્ધર્વકુલપૂજિતા ।
ગયા ગૌરી ચ ગિરિજા ગિરિસ્થા ગિરિસમ્ભવા ॥ ૩૬॥

ગિરિગહ્વરમધ્યસ્થા કુઞ્જરેશ્વરગામિની ।
કિરીટિની ચ ગદિની ગુઞ્જાહારવિભૂષણા ॥ ૩૭॥

ગણપા ગણકા ગણ્યા ગણકાનન્દકારિણી ।
ગણપૂજ્યા ચ ગીર્વાણી ગણપાનનન્દકારિણી ॥ ૩૮॥

ગુરુમાતા ગુરુરતા ગુરુભક્તિપરાયણા ।
ગોત્રા ગૌઃ કૃષ્ણભગિની કૃષ્ણસૂઃ કૃષ્ણનન્દિની ॥ ૩૯॥

ગોવર્ધની ગોત્રધરા ગોવર્ધનકૃતાલયા ।
ગોવર્ધનધરા ગોદા ગૌરાઙ્ગી ગૌતમાત્મજા ॥ ૪૦॥

ઘર્ઘરા ઘોરરૂપા ચ ઘોરા ઘર્ઘરનાદિની ।
શ્યામા ઘનરવાઽઘોરા ઘના ઘોરાર્તિનાશિની ॥ ૪૧॥

ઘનસ્થા ચ ઘનાનન્દા દારિદ્ર્યઘનનાશિની ।
ચિત્તજ્ઞા ચિન્તિતપદા ચિત્તસ્થા ચિત્તરૂપિણી ॥ ૪૨॥

ચક્રિણી ચારુચમ્પાભા ચારુચમ્પકમાલિની ।
ચન્દ્રિકા ચન્દ્રકાન્તિશ્ચ ચાપિની ચન્દ્રશેખરા ॥ ૪૩॥

ચણ્ડિકા ચણ્ડદૈત્યઘ્ની ચન્દ્રશેખરવલ્લભા ।
ચાણ્ડાલિની ચ ચામુણ્ડા ચણ્ડમુણ્ડવધોદ્યતા ॥ ૪૪॥

ચૈતન્યભૈરવી ચણ્ડા ચૈતન્યઘનગેહિની ।
ચિત્સ્વરૂપા ચિદાધારા ચણ્ડવેગા ચિદાલયા ॥ ૪૫॥

ચન્દ્રમણ્ડલમધ્યસ્થા ચન્દ્રકોટિસુશીતલા ।
ચપલા ચન્દ્રભગિની ચન્દ્રકોટિનિભાનના ॥ ૪૬॥

ચિન્તામણિગુણાધારા ચિન્તામણિવિભૂષણા ।
ભક્તચિન્તામણિલતા ચિન્તામણિકૃતાલયા ॥ ૪૭॥

ચારુચન્દનલિપ્તાઙ્ગી ચતુરા ચ ચતુર્મુખી ।
ચૈતન્યદા ચિદાનન્દા ચારુચામરવીજિતા ॥ ૪૮॥

છત્રદા છત્રધારી ચ છલચ્છદ્મવિનાશિની ।
છત્રહા છત્રરૂપા ચ છત્રચ્છાયાકૃતાલયા ॥ ૪૯॥

જગજ્જીવા જગદ્ધાત્રી જગદાનન્દકારિણી ।
યજ્ઞપ્રિયા યજ્ઞરતા જપયજ્ઞપરાયણા ॥ ૫૦॥

જનની જાનકી યજ્વા યજ્ઞહા યજ્ઞનન્દિની ।
યજ્ઞદા યજ્ઞફલદા યજ્ઞસ્થાનકૃતાલયા ॥ ૫૧॥

યજ્ઞભોક્ત્રી યજ્ઞરૂપા યજ્ઞવિઘ્નવિનાશિની ।
જપાકુસુમસઙ્કાશા જપાકુસુમશોભિતા ॥ ૫૨॥

જાલન્ધરી જયા જૈત્રી જીમૂતચયભાષિણી ।
જયદા જયરૂપા ચ જયસ્થા જયકારિણી ॥ ૫૩॥

જગદીશપ્રિયા જીવા જલસ્થા જલજેક્ષણા ।
જલરૂપા જહ્નુકન્યા યમુના જલજોદરી ॥ ૫૪॥

જલજાસ્યા જાહ્નવી ચ જલજાભા જલોદરી ।
યદુવંશોદ્ભવા જીવા યાદવાનન્દકારિણી ॥ ૫૫॥

યશોદા યશસાં રાશિર્યશોદાનન્દકારિણી ।
જ્વલિની જ્વાલિની જ્વાલા જ્વલત્પાવકસન્નિભા ॥ ૫૬॥

જ્વાલામુખી જગન્માતા યમલાર્જુનભઞ્જની ।
જન્મદા જન્મહા જન્યા જન્મભૂર્જનકાત્મજા ॥ ૫૭॥

જનાનન્દા જામ્બવતી જમ્બૂદ્વીપકૃતાલયા ।
જામ્બૂનદસમાનાભા જામ્બૂનદવિભૂષણા ॥ ૫૮॥

જમ્ભહા જાતિદા જાતિર્જ્ઞાનદા જ્ઞાનગોચરા ।
જ્ઞાનરૂપાઽજ્ઞાનહા ચ જ્ઞાનવિજ્ઞાનશાલિની ॥ ૫૯॥

જિનજૈત્રી જિનાધારા જિનમાતા જિનેશ્વરી ।
જિતેન્દ્રિયા જનાધારા અજિનામ્બરધારિણી ॥ ૬૦॥

શમ્ભુકોટિદુરાધર્ષા વિષ્ણુકોટિવિમર્દિની ।
સમુદ્રકોટિગમ્ભીરા વાયુકોટિમહાબલા ॥ ૬૧॥

સૂર્યકોટિપ્રતીકાશા યમકોટિદુરાપહા ।
કામધુક્કોટિફલદા શક્રકોટિસુરાજ્યદા ॥ ૬૨॥

કન્દર્પકોટિલાવણ્યા પદ્મકોટિનિભાનના ।
પૃથ્વીકોટિજનાધારા અગ્નિકોટિભયઙ્કરી ॥ ૬૩॥

અણિમા મહિમા પ્રાપ્તિર્ગરિમા લઘિમા તથા ।
પ્રાકામ્યદા વશકરી ઈશિકા સિદ્ધિદા તથા ॥ ૬૪॥

મહિમાદિગુણોપેતા અણિમાદ્યષ્ટસિદ્ધિદા ।

જવનઘ્ની જનાધીના જામિની ચ જરાપહા ॥ ૬૫॥

તારિણી તારિકા તારા તોતલા તુલસીપ્રિયા ।
તન્ત્રિણી તન્ત્રરૂપા ચ તન્ત્રજ્ઞા તન્ત્રધારિણી ॥ ૬૬॥

તારહારા ચ તુલજા ડાકિનીતન્ત્રગોચરા ।
ત્રિપુરા ત્રિદશા ત્રિસ્થા ત્રિપુરાસુરઘાતિની ॥ ૬૭॥

ત્રિગુણા ચ ત્રિકોણસ્થા ત્રિમાત્રા ત્રિતનુસ્થિતા ।
ત્રૈવિદ્યા ચ ત્રયી ત્રિઘ્ની તુરીયા ત્રિપુરેશ્વરી ॥ ૬૮॥

ત્રિકોદરસ્થા ત્રિવિધા ત્રૈલોક્યા ત્રિપુરાત્મિકા ।
ત્રિધામ્ની ત્રિદશારાધ્યા ત્ર્યક્ષા ત્રિપુરવાસિની ॥ ૬૯॥

ત્રિવર્ણી ત્રિપદી તારા ત્રિમૂર્તિજનની ત્વરા ।
ત્રિદિવા ત્રિદિવેશાઽઽદિર્દેવી ત્રૈલોક્યધારિણી ॥ ૭૦॥

ત્રિમૂર્તિશ્ચ ત્રિજનની ત્રીભૂસ્ત્રીપુરસુન્દરી ।
તપસ્વિની તપોનિષ્ઠા તરુણી તારરૂપિણી ॥ ૭૧॥

તામસી તાપસી ચૈવ તાપઘ્ની ચ તમોપહા ।
તરુણાર્કપ્રતીકાશા તપ્તકાઞ્ચનસન્નિભા ॥ ૭૨॥

ઉન્માદિની તન્તુરૂપા ત્રૈલોક્યવ્યાપિનીશ્વરી ।
તાર્કિકી તર્કિકી વિદ્યા તાપત્રયવિનાશિની ॥ ૭૩॥

ત્રિપુષ્કરા ત્રિકાલજ્ઞા ત્રિસન્ધ્યા ચ ત્રિલોચના ।
ત્રિવર્ગા ચ ત્રિવર્ગસ્થા તપસસ્સિદ્ધિદાયિની ॥ ૭૪॥

અધોક્ષજા અયોધ્યા ચ અપર્ણા ચ અવન્તિકા ।
કારિકા તીર્થરૂપા ચ તીરા તીર્થકરી તથા ॥ ૭૫॥

દારિદ્ર્યદુઃખદલિની અદીના દીનવત્સલા ।
દીનાનાથપ્રિયા દીર્ઘા દયાપૂર્ણા દયાત્મિકા ॥ ૭૬॥

દેવદાનવસમ્પૂજ્યા દેવાનાં પ્રિયકારિણી ।
દક્ષપુત્રી દક્ષમાતા દક્ષયજ્ઞવિનાશિની ॥ ૭૭॥

દેવસૂર્દક્ષીણા દક્ષા દુર્ગા દુર્ગતિનાશિની ।
દેવકીગર્ભસમ્ભૂતા દુર્ગદૈત્યવિનાશિની ॥ ૭૮॥

અટ્ટાડટ્ટહાસિની દોલા દોલાકર્માભિનન્દિની ।
દેવકી દેવિકા દેવી દુરિતઘ્ની તટિત્તથા ॥ ૭૯॥

ગણ્ડકી ગલ્લકી ક્ષિપ્રા દ્વારા દ્વારવતી તથા ।
આનન્દોદધિમધ્યસ્થા કટિસૂત્રૈરલઙ્કૃતા ॥ ૮૦॥

ઘોરાગ્નિદાહદમની દુઃખદુસ્સ્વપ્નનાશિની ।
શ્રીમયી શ્રીમતી શ્રેષ્ઠા શ્રીકરી શ્રીવિભાવિની ॥ ૮૧॥

શ્રીદા શ્રીશા શ્રીનિવાસા શ્રીમતી શ્રીર્મતિર્ગતિઃ ।
ધનદા દામિની દાન્તા ધમદો ધનશાલિની ॥ ૮૨॥

દાડિમીપુષ્પસઙ્કાશા ધનાગારા ધનઞ્જયા ।
ધૂમ્રાભા ધૂમ્રદૈત્યઘ્ની ધવલા ધવલપ્રિયા ॥ ૮૩॥

ધૂમ્રવક્ત્રા ધૂમ્રનેત્રા ધૂમ્રકેશી ચ ધૂસરા ।
ધરણી ધરિણી ધૈર્યા ધરા ધાત્રી ચ ધૈર્યદા ॥ ૮૪॥

દમિની ધર્મિણી ધૂશ્ચ દયા દોગ્ધ્રી દુરાસદા ।
નારાયણી નારસિંહી નૃસિંહહૃદયાલયા ॥ ૮૫॥

નાગિની નાગકન્યા ચ નાગસૂર્નાગનાયિકા ।
નાનારત્નવિચિત્રાઙ્ગી નાનાભરણમણ્ડિતા ॥ ૮૬॥

દુર્ગસ્થા દુર્ગરૂપા ચ દુઃખદુષ્કૃતનાશિની ।
હીઙ્કારી ચૈવ શ્રીઙ્કારી હુઙ્કારી ક્લેશનાશિની ॥ ૮૭॥

નગાત્મજા નાગરી ચ નવીના નૂતનપ્રિયા ।
નીરજાસ્યા નીરદાભા નવલાવણ્યસુન્દરી ॥ ૮૮॥

નીતિજ્ઞા નીતિદા નીતિર્નિમનાભિર્નગેશ્વરી ।
નિષ્ઠા નિત્યા નિરાતઙ્કા નાગયજ્ઞોપવીતિની ॥ ૮૯॥

નિધિદા નિધિરૂપાચ નિર્ગુણા નરવાહિની ।
નરમાંસરતા નારી નરમુણ્ડવિભૂષણા ॥ ૯૦॥

નિરાધારા નિર્વિકારા નુતિર્નિર્વાણસુન્દરી ।
નરાસૃક્પાનમત્તા ચ નિર્વૈરા નાગગામિની ॥ ૯૧॥

પરમા પ્રમિતા પ્રાજ્ઞા પાર્વતી પર્વતાત્મજા ।
પર્વપ્રિયા પર્વરતા પર્વપાવનપાવની ॥ ૯૨॥

પરાત્પરતરા પૂર્વા પશ્ચિમા પાપનાશિની ।
પશૂનાં પતિપત્ની ચ પતિભક્તિપરાયણા ॥ ૯૩ ॥

પરેશી પારગા પારા પરઞ્જ્યોતિસ્વરૂપિણી ।
નિષ્ઠુરા ક્રૂરહૃદયા પરાસિદ્ધિઃ પરાગતિઃ ॥ ૯૪ ॥

પશુઘ્ની પશુરૂપા ચ પશુહા પશુવાહિની ।
પિતા માતા ચ યન્ત્રી ચ પશુપાશવિનાશિની ॥ ૯૫ ॥

પદ્મિની પદ્મહસ્તા ચ પદ્મકિઞ્જલ્કવાસિની ।
પદ્મવક્ત્રા ચ પદ્માક્ષી પદ્મસ્થા પદ્મસમ્ભવા ॥ ૯૬ ॥

પદ્માસ્યા પઞ્ચમી પૂર્ણા  પૂર્ણપીઠનિવાસિની ।
પદ્મરાગપ્રતીકાશા પાઞ્ચાલી પઞ્ચમપ્રિયા ॥ ૯૭ ॥

પરબ્રહ્મસ્વરૂપા ચ પરબ્રહ્મનિવાસિની ।
પરમાનન્દમુદિતા પરચક્રનિવાસિની ॥ ૯૮ ॥

પરેશી પરમા પૃથ્વી પીનતુઙ્ગપયોધરા ।
પરાપરા પરાવિદ્યા પરમાનન્દદાયિની ॥ ૯૯ ॥

પૂજ્યા પ્રજ્ઞાવતી પુષ્ટિઃ પિનાકિપરિકીર્તિતા ।
પ્રાણઘ્ની પ્રાણરૂપા ચ પ્રાણદા ચ પ્રિયંવદા ॥ ૧૦૦ ॥

ફણિભૂષા ફણાવેશી ફકારકણ્ઠમાલિની ।
ફણિરાડ્કૃતસર્વાઙ્ગી ફલભાગનિવાસિની ॥ ૧૦૧ ॥

બલભદ્રસ્ય ભગિની બાલા બાલપ્રદાયિની ।
ફલ્ગુરુપા પ્રલમ્બઘ્ની ફલ્ગૂત્સવ વિનોદિની ॥ ૧૦૨ ॥

ભવાની ભવપત્ની ચ ભવભીતિહરા ભવા ।
ભવેશ્વરી ભવારાધ્યા ભવેશી ભવનાયિકા ॥ ૧૦૩ ॥

ભવમાતા ભવાગમ્યા ભવકણ્ટકનાશિની ।
ભવપ્રિયા ભવાનન્દા ભવ્યા ચ ભવમોચની ॥ ૧૦૪ ॥

ભાવનીયા ભગવતી ભવભારવિનાશિની ।
ભૂતધાત્રી ચ ભૂતેશી ભૂતસ્થા ભૂતરૂપિણી ॥ ૧૦૫ ॥

ભૂતમાતા ચ ભૂતઘ્ની ભૂતપઞ્ચકવાસિની ।

ભોગોપચારકુશલા ભિસ્સાધાત્રી ચ ભૂચરી ॥ ૧૦૬॥

ભીતિઘ્ની ભક્તિગમ્યા ચ ભક્તાનામાર્તિનાશિની ।
ભક્તાનુકમ્પિની ભીમા ભગિની ભગનાયિકા ॥ ૧૦૭॥

ભગવિદ્યા ભગક્લિન્ના ભગયોનિર્ભગપ્રદા ।
ભગેશી ભગરૂપા ચ ભગગુહ્યા ભગાપહા ॥ ૧૦૮॥

ભગોદરી ભગાનન્દા ભગાઢ્યા ભગમાલિની ।
ભોગપ્રદા ભોગવાસા ભોગમૂલા ચ ભોગિની ॥ ૧૦૯॥

ભેરુણ્ડા ભેદિની ભીમા ભદ્રકાલી ભિદોજ્ઝિતા ।
ભૈરવી ભુવનેશાની ભુવના ભુવનેશ્વરી ॥ ૧૧૦॥

ભીમાક્ષી ભારતી ચૈવ ભૈરવાષ્ટકસેવિતા ।
ભાસ્વરા ભાસ્વતી ભીતિર્ભાસ્વદુત્તાનશાયિની ॥ ૧૧૧॥

ભાગીરથી ભોગવતી ભવઘ્ની ભુવનાત્મિકા ।
ભૂતિદા ભૂતિરૂપા ચ ભૂતસ્થા ભૂતવર્ધિની ॥ ૧૧૨॥

માહેશ્વરી મહામાયા મહાતેજા મહાસુરી ।
મહાજિહ્વા મહાલોલા મહાદંષ્ટ્રા મહાભુજા ॥ ૧૧૩॥

મહામોહાન્ધકારઘ્ની મહામોક્ષપ્રદાયિની ।
મહાદારિદ્ર્યશમની મહાશત્રુવિમર્દિની ॥ ૧૧૪॥

મહાશક્તિર્મહાજ્યોતિર્મહાસુરવિમર્દિની ।
મહાકાયા મહાવીર્યા મહાપાતકનાશિની ॥ ૧૧૫॥

મહારવા મન્ત્રમયી મણિપૂરનિવાસિની ।
માનસી માનદા માન્યા મનશ્ચક્ષુરગોચરા ॥ ૧૧૬॥

માહેન્દ્રી મધુરા માયા મહિષાસુરમર્દિની ।
મહાકુણ્ડલિની શક્તિર્મહાવિભવવર્ધિની ॥ ૧૧૭॥

માનસી માધવી મેધા મતિદા મતિધારિણી ।
મેનકાગર્ભસમ્ભૂતા મેનકાભગિની મતિઃ ॥ ૧૧૮॥

મહોદરી મુક્તકેશી મુક્તિકામ્યાર્થસિદ્ધિદા ।
માહેશી મહિષારૂઢા મધુદૈત્યવિમર્દિની ॥ ૧૧૯॥

મહાવ્રતા મહામૂર્ધા મહાભયવિનાશિની ।
માતઙ્ગી મત્તમાતઙ્ગી માતઙ્ગકુલમણ્ડિતા ॥ ૧૨૦॥

મહાઘોરા માનનીયા મત્તમાતઙ્ગગામિની ।
મુક્તાહારલતોપેતા મદઘૂર્ણિતલોચના ॥ ૧૨૧॥

મહાપરાધરાશિઘ્ની મહાચોરભયાપહા ।
મહાચિન્ત્યસ્વરૂપા ચ મણીમન્ત્રમહૌષધી ॥ ૧૨૨॥

મણિમણ્ડપમધ્યસ્થા મણિમાલાવિરાજિતા ।
મન્ત્રાત્મિકા મન્ત્રગમ્યા મન્ત્રમાતા સુમન્ત્રિણી ॥ ૧૨૩॥

મેરુમન્દિરમધ્યસ્થા મકરાકૃતિકુણ્ડલા ।
મન્થરા ચ મહાસૂક્ષ્મા મહાદૂતી મહેશ્વરી ॥ ૧૨૪॥

માલિની માનવી માધ્વી મદરૂપા મદોત્કટા ।
મદિરા મધુરા ચૈવ મોદિની ચ મહોદ્ધતા ॥ ૧૨૫॥

મઙ્ગલાઙ્ગી મધુમયી મધુપાનપરાયણા ।
મનોરમા રમામાતા રાજરાજેશ્વરી રમા ॥ ૧૨૬॥

રાજમાન્યા રાજપૂજ્યા રક્તોત્પલવિભૂષણા ।
રાજીવલોચના રામા રાધિકા રામવલ્લભા ॥ ૧૨૭॥

શાકિની ડાકિની ચૈવ લાવણ્યામ્બુધિવીચિકા ।
રુદ્રાણી રુદ્રરૂપા ચ રૌદ્રા રુદ્રાર્તિનાશિની ॥ ૧૨૮॥

રક્તપ્રિયા રક્તવસ્ત્રા રક્તાક્ષી રક્તલોચના ।
રક્તકેશી રક્તદંષ્ટ્રા રક્તચન્દનચર્ચિતા ॥ ૧૨૯॥

રક્તાઙ્ગી રક્તભૂષા ચ રક્તબીજનિપાતિની ।
રાગાદિદોષરહિતા રતિજા રતિદાયિની ॥ ૧૩૦॥

વિશ્વેશ્વરી વિશાલાક્ષી વિન્ધ્યપીઠનિવાસિની ।
વિશ્વભૂર્વીરવિદ્યા ચ વીરસૂર્વીરનન્દિની ॥ ૧૩૧॥

વીરેશ્વરી વિશાલાક્ષી વિષ્ણુમાયા વિમોહિની ।
વિદ્યાવતી વિષ્ણુરૂપા વિશાલનયનોજ્જ્વલા ॥ ૧૩૨॥

વિષ્ણુમાતા ચ વિશ્વાત્મા વિષ્ણુજાયાસ્વરૂપિણી ।
વારાહી વરદા વન્દ્યા વિખ્યાતા વિલસલ્કચા ॥ ૧૩૩॥

બ્રહ્મેશી બ્રહ્મદા બ્રાહ્મી બ્રહ્માણી બ્રહ્મરૂપિણી ।
દ્વારકા વિશ્વવન્દ્યા ચ વિશ્વપાશવિમોચની ।
વિશ્વાસકારિણી વિશ્વા વિશ્વશક્તિર્વિચક્ષણા ॥ ૧૩૪॥

બાણચાપધરા વીરા બિન્દુસ્થા બિન્દુમાલિની ।
ષટ્ચક્રભેદિની ષોઢા ષોડશારનિવાસિની ॥ ૧૩૫॥

શિતિકણ્ઠપ્રિયા શાન્તા શાકિની વાતરૂપિણી ।
શાશ્વતી શમ્ભુવનિતા શામ્ભવી શિવરૂપિણી ॥ ૧૩૬॥

શિવમાતા ચ શિવદા શિવા શિવહૃદાસના ।
શુક્લામ્બરા શીતલા ચ શીલા શીલપ્રદાયિની ॥ ૧૩૭॥

શિશુપ્રિયા વૈદ્યવિદ્યા સાલગ્રામશિલા શુચિઃ ।
હરિપ્રિયા હરમૂર્તિર્હરિનેત્રકૃતાલયા ॥ ૧૩૮॥

હરિવક્ત્રોદ્ભવા હાલા હરિવક્ષઃસ્થલસ્થિતા ।
ક્ષેમઙ્કરી ક્ષિતિઃ ક્ષેત્રા ક્ષુધિતસ્ય પ્રપૂરણી ॥ ૧૩૯॥

વૈશ્યા ચ ક્ષત્રિયા શૂદ્રી ક્ષત્રિયાણાં કુલેશ્વરી ।
હરપત્ની હરારાધ્યા હરસૂર્હરરૂપિણી ॥ ૧૪૦॥

સર્વાનન્દમયી સિદ્ધિસ્સર્વરક્ષાસ્વરૂપિણી ।
સર્વદુષ્ટપ્રશમની સર્વેપ્સિતફલપ્રદા ॥ ૧૪૧॥

સર્વસિદ્ધેશ્વરારાધ્યા સર્વમઙ્ગલમઙ્ગલા ।

ફલશ્રુતિઃ ।
પુણ્યં સહસ્રનામેદં તવ પ્રીત્યા પ્રકાશિતમ્ ॥ ૧૪૨॥

ગોપનીયં પ્રયત્નેન પઠનીયં પ્રયત્નતઃ ।
નાતઃ પરતરં પુણ્યં નાતઃ પરતરં તપઃ ॥ ૧૪૩॥

નાતઃ પરતરં સ્તોત્રં નાતઃ પરતરા ગતિઃ ।
સ્તોત્રં નામસહસ્રાખ્યં મમ વક્ત્રાદ્વિનિર્ગતમ્ ॥ ૧૪૪॥

યઃ પઠેત્પરયા ભક્ત્યા શ‍ૃણુયાદ્વા સમાહિતઃ ।
મોક્ષાર્થી લભતે મોક્ષં સ્વર્ગાર્થી સ્વર્ગમાપ્નુયાત્ ॥ ૧૪૫॥

કામાર્થી લભતે કામં ધનાર્થી લભતે ધનમ્ ।

વિદ્યાર્થી લભતે વિદ્યાં યશોઽર્થી લભતે યશઃ ॥ ૧૪૬॥

કન્યાર્થી લભતે કન્યાં સુતાર્થી લભતે સુતાન્ ।
મૂર્ખોઽપિ લભતે શાસ્ત્રં ચોરોઽપિ લભતે ગતિમ્ ॥ ૧૪૭॥

ગુર્વિણી જનયેત્પુત્રં કન્યાં વિન્દતિ સત્પતિમ્ ।
સંક્રાન્ત્યાં ચ ચતુર્દશ્યામષ્ટમ્યાં ચ વિશેષતઃ ॥ ૧૪૮॥

પૌર્ણમાસ્યામમાવાસ્યાં નવમ્યાં ભૌમવાસરે ।
પઠેદ્વા પાઠયેદ્વાપિ પૂજયેદ્વાપિ પુસ્તકમ્ ॥ ૧૪૯॥

સ મુક્તસ્સર્વપાપેભ્યઃ કામેશ્વરસમો ભવેત્ ।
લક્ષ્મીવાન્ સુતવાંશ્ચૈવ વલ્લભસ્સર્વયોષિતામ્ ॥ ૧૫૦॥

તસ્ય વશ્યં ભવેદાશુ ત્રૈલોક્યં સચરાચરમ્ ।
વિદ્યાનાં પારગો વિપ્રઃ ક્ષત્રિયો વિજયી રણે ॥ ૧૫૧॥

વૈશ્યો ધનસમૃદ્ધસ્સ્યાચ્છૂદ્રસ્સુખમવાપ્નુયાત્ ।
ક્ષેત્રે ચ બહુસસ્યં સ્યાદ્ગાવશ્ચ બહુદુગ્ધદાઃ ॥ ૧૫૨॥

નાશુભં નાપદસ્તસ્ય ન ભયં નૃપશત્રુતઃ ।
જાયતે નાશુભા બુદ્ધિર્લભતે કુલપૂજ્યતામ્ ॥ ૧૫૩॥

ન બાધન્તે ગ્રહાસ્તસ્ય ન રક્ષાંસિ ન પન્નગાઃ ।
ન પિશાચા ન ડાકિન્યો ભૂતભેતાલડમ્ભકાઃ ॥ ૧૫૪॥

બાલગ્રહાભિભૂતાનાં બાલાનાં શાન્તિકારકમ્ ।
દ્વન્દ્વાનાં પ્રતિભેદે ચ મૈત્રીકરણમુત્તમમ્ ॥ ૧૫૫॥

લોહપાશૈર્દૃઢૈર્બદ્ધો બન્દી વેશ્મનિ દુર્ગમે ।
તિષ્ઠઞ્છૃણ્વન્પતન્મર્ત્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૧૫૬॥

પશ્યન્તિ નહિ તે શોકં વિયોગં ચિરજીવિનઃ ।
શ ૃણ્વતી બદ્ધગર્ભા ચ સુખં ચૈવ પ્રસૂયતે ॥ ૧૫૭॥

એકદા પઠનાદેવ સર્વપાપક્ષયો ભવેત્ ।
નશ્યન્તિ ચ મહારોગા દશધાવર્તનેન ચ ॥ ૧૫૮॥

શતધાવર્તને ચૈવ વાચાં સિદ્ધિઃ પ્રજાયતે ।
નવરાત્રે જિતાહારો દૃઢબુદ્ધિર્જિતેન્દ્રિયઃ ॥ ૧૫૯॥

અમ્બિકાયતને વિદ્વાન્ શુચિષ્માન્ મૂર્તિસન્નિધૌ ।
એકાકી ચ દશાવર્તં પઠન્ધીરશ્ચ નિર્ભયઃ ॥ ૧૬૦॥

સાક્ષાત્ત્વગવતી તસ્મૈ પ્રયચ્છેદીપ્સિતં ફલમ્ ।
સિદ્ધપીઠે ગિરૌ રમ્યે સિદ્ધક્ષેત્રે સુરાલયે ॥ ૧૬૧॥

પઠનાત્સાધકસ્યાશુ સિદ્ધિર્ભવતિ વાઞ્છિતા ।
દશાવર્તં પઠેન્નિત્યં ભૂમીશાયી નરશ્શુચિઃ ॥ ૧૬૨॥

સ્વપ્ને મૂર્તિમયાં દેવીં વરદાં સોઽપિ પશ્યતિ ।
આવર્તનસહસ્રૈર્યે જપન્તિ પુરુષોત્તમાઃ ॥ ૧૬૩॥

તે સિદ્ધા સિદ્ધિદા લોકે શાપાનુગ્રહણક્ષમાઃ ।
પ્રયચ્છન્તશ્ચ સર્વસ્વં સેવન્તે તાન્મહીશ્વરાઃ ॥ ૧૬૪॥

ભૂર્જપત્રેઽષ્ટગન્ધેન લિખિત્વા તુ શુભે દિને ।
ધારયેદ્યન્ત્રિતં શીર્ષે પૂજયિત્વા કુમારિકામ્ ॥ ૧૬૫॥

બ્રાહ્મણાન્ વરનારીશ્ચ ધૂપૈઃ કુસુમચન્દનૈઃ ।
ક્ષીરખણ્ડાદિભોજ્યાંશ્ચ ભોજયિત્વા સુભક્તિતઃ ॥ ૧૬૬॥

બધ્નન્તિ યે મહારક્ષાં બાલાનાં ચ વિશેષતઃ ।
રુદ્રં દૃષ્ટ્વા યથા દેવં વિષ્ણું દૃષ્ટ્વા ચ દાનવાઃ ॥ ૧૬૭॥

પન્નગા ગરુડં દૃષ્ટ્વા સિંહં દૃષ્ટ્વા યથા ગજાઃ ।
મણ્ડૂકા ભોગિનં દૃષ્ટ્વા માર્જારં મૂષિકાસ્તથા ॥ ૧૬૮॥

વિઘ્નભૂતાઃ પલાયન્તે તસ્ય વક્ત્રવિલોકનાત્ ।
અગ્નિચોરભયં તસ્ય કદાચિન્નૈવ સમ્ભવેત્ ॥ ૧૬૯॥

પાતકાન્વિવિધાન્સોઽપિ મેરુમન્દરસન્નિભાન્ ।
ભસ્મિતાન્કુરુતે ક્ષિપ્રં તૃણં વહ્નિહુતં યથા ॥ ૧૭૦॥

નૃપાશ્ચ વશ્યતાં યાન્તિ નૃપપૂજ્યાશ્ચ તે નરાઃ ।
મહાર્ણવે મહાનદ્યાં પોતસ્થે ચ ન ભીઃ કચિત્ ॥ ૧૭૧॥

રણે દ્યૂતે વિવાદે ચ વિજયં પ્રાપ્નુવન્તિ તે ।
સર્વત્ર પૂજિતો લોકૈર્બહુમાનપુરસ્સરૈઃ ॥ ૧૭૨॥

રતિરાગવિવૃદ્ધાશ્ચ વિહ્વલાઃ કામપીડિતાઃ ।
યૌવનાક્રાન્તદેહાસ્તાન્ શ્રયન્તે વામલોચનાઃ ॥ ૧૭૩॥

સહસ્રં જપતે યસ્તુ ખેચરી જાયતે નરઃ ।
સહસ્રદશકં દેવિ યઃ પઠેદ્ભક્તિમાન્નરઃ ॥ ૧૭૪॥

સા તસ્ય જગતાં ધાત્રી પ્રત્યક્ષા ભવતિ ધ્રુવમ્ ।
લક્ષં પૂર્ણં યદા દેવિ સ્તોત્રરાજં જપેત્સુધીઃ ॥ ૧૭૫॥

ભવપાશવિનિર્મુક્તો મમ તુલ્યો ન સંશયઃ ।
સર્વતીર્થેષુ યત્પુણ્યં સર્વતીર્થેષુ યત્ફલમ્ ॥ ૧૭૬॥

સર્વધર્મેષુ યજ્ઞેષુ સર્વદાનેષુ યત્ફલમ્ ।
સર્વવેદેષુ પ્રોક્તેષુ યત્ફલં પરિકીર્તિતમ્ ॥ ૧૭૭॥

તત્પુણ્યં કોટિગુણિતં સકૃજ્જપ્ત્વા લભેન્નરઃ ।
દેહાન્તે પરમં સ્થાનં યત્સુરૈરપિ દુર્લભમ્ ।
સ યાસ્યતિ ન સન્દેહસ્સ્તવરાજસ્ય કીર્તનાત્ ॥ ૧૭૮॥

॥ ઇતિ રુદ્રયામલે શ્રીઅન્નપૂર્ણાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by DPD

*Shriannapurnasahasranamastotram*

pdf was typeset on July 6, 2022

Please send corrections to *sanskrit@cheerful.com*